4. ईशानकोणे कलशोपरि ईशानं पूजयेत् —

ॐ तमीशानं जगतस्तस्थुषस्पतिं धियञ्जिन्वमवसे हूमहे वयम् । पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ।

सुप्रतीकाय नमः । मंगलाय नमः ।

ॐ भूर्भुवः स्वः ईशानाय नमः । ईशानम् आवाहयामि स्थापयामि पूजयामि ।

सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि नमस्करोमि । उपरि ध्वजपताकाभ्यां नमः ।

बलिदानम् — ईशानाय सांगाय सपरिवाराय सायुधाय सशक्तिकाय सवाहनाय अमुं बलिं समर्पयामि ।

भो ईशान ! स्वां दिशं रक्ष बलिं भक्ष अत्रस्यानां सर्वेषां यज्ञ सहायिकानां समस्त भारतवासीनाम् तथा च समस्त ब्राह्मणानां गृहे आयुः कर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता वरदो भव ।

अनेन बलिदानेन ईशानः प्रीयताम् न मम ।

9. ईशानपूर्वयोर्मध्ये कलशोपरि ब्रह्माणं पूजयेत् —

ॐ आस्मे रुद्रा मेहना पर्वतासो वृत्रहत्ये भरहूतौ सजोषाः । यः शंसते स्तुवते धायि पज्र इन्द्रज्येष्ठा अस्माँ अवन्तु देवाः ।

ॐ भूर्भुवः स्वः ब्रह्मणे नमः । ब्रह्माणम् आवाहयामि स्थापयामि पूजयामि ।

सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि नमस्करोमि ।

उपरि ध्वजपताकाभ्यां नमः ।

बलिदानम् — ब्रह्मणे सांगाय सपरिवाराय सायुधाय सशक्तिकाय सवाहनाय अमुं बलिं समर्पयामि ।

भो ब्रह्मन्! स्वां दिशं रक्ष बलिं भक्ष अत्रस्थानां सर्वेषां यज्ञ सहायिकानां समस्त भारतवासीनाम् तथा च समस्त ब्राह्मणानां गृहे आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता वरदो भव ।

अनेन बलिदानेन ब्रह्मा प्रीयताम् न मम ।

10. नैर्ऋत्य पश्चिमयोर्मध्ये कलशोपरि अनन्तं पूजयेत् –
ॐ स्योना पृथिवी नो भवानृक्षरा निवेशनी यच्छान: शर्म्म सप्रथा: ॥
ॐ भूर्भुव: स्व: अनन्ताय नम: । अनन्तम् आवाहयामि स्थापयामि पूजयामि ।
सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि नमस्करोमि । उपरि ध्वजपताकाभ्यां नम: ।
बलिदानम् – अनन्ताय सांगाय सपरिवाराय सायुधाय सशक्तिकाय सवाहनाय अमुं बलिं समर्पयामि ।
भो अनन्त ! स्वां दिशं रक्ष बलिं भक्ष अत्रस्थानां सर्वेषां यज्ञ सहायिकानां समस्त भारतवासीनाम् तथाच समस्त ब्राह्मणानां गृहे आयु: कर्त्ता क्षेमकर्त्ता शान्तिकर्त्ता पुष्टिकर्त्ता तुष्टिकर्त्ता वरदो भव।
अनेन बलिदानेन अनन्त: प्रीयताम् न मम ।

ईशाने महाध्वज पूजनम् –

ॐ आब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः शूर इषव्योतिव्याधी महारथो जायतां दोग्ध्री धेनुर्वोढ़ा नड्वानाशुः सप्तिः पुरन्ध्रि र्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ।

ॐ सर्वेभ्यो देवेभ्यो नमः ।

वंशे – किन्नरेभ्यो नमः । पन्नगेभ्यो नमः ।

चतुर्दश स्थावरेभ्यो नमः । सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि नमस्करोमि ।

बलिदान – सार्वभौतिकाधिपति रूद्राय सांगाय सपरिवाराय सायुधाय सशक्तिकाय ... नाम अमुं बलिं समर्पयामि ॥

प्रार्थना → त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च ।
ब्रह्म विष्णु शिवैः सार्धम् रक्षां कुर्वन्तु तानि मे ।
देवदानवगन्धर्वा यक्षराक्षसपन्नगाः । ऋषयो मुनयो गावो देवमातर एव च । सर्वे ममाध्वरे रक्षां प्रकुर्वन्तु मुदान्विताः ।
ब्रह्मा विष्णुश्च रूद्रश्च क्षेत्रपालगणैः सह । रक्षन्तु मण्डपं सर्वे घ्नन्तु रक्षांसि सर्वतः ॥

अनेन सार्वभौतिक बलिदानेन सार्वभौतिकाधिपति रूद्रः प्रीयताम् न मम ।

हस्तौ पादौ प्रक्षाल्य मण्डपे प्रविशेत

ध्वजा पताका निवेशनम्

{ त्रिकोण - 1 / चतुष्कोण - 1 }

1	पूर्व	इन्द्र	पीला
2	अग्नि	अग्नि	लाल
3	दक्षिण	यम	काला
4	नैऋत्य	निर्ऋति	नीला
5	पश्चिम	वरुण	सफेद
6	वायव्य	वायु	हरा
7	उत्तर	सोम	हरा
8	ईशान	ईशान	सफेद
9	ईशानपूर्वयोर्मध्ये	ब्रह्मा	लाल
10	नैऋत्यपश्चिमयोर्मध्ये	अनन्त	पीला

	त्रिकोण	चतुष्कोण
लाल	2	2
पीला	2	2
काला	1	1
सफेद	2	2
हरा	2	2
नीला	1	1
	10	10

Date

शंखपूजन – अग्निर्ऋषि : पवमान : पाञ्चजन्य:
पुरोहित: तमीमहे महागयम् । उपयाम गृहीतो-
स्यग्नयेत्वा वर्चसऽएष ते योनिरग्नये त्वा वर्चसे॥

त्वं पुरा सागरोत्पन्नो विष्णुना विधृत: करे । नमित:
सर्व देवैश्च पांचजन्य नमोऽस्तुते ॥
पांचजन्याय विद्महे पवमानाय धीमहि । तन्नोशंख:
प्रचोदयात् ।

शंखस्थ देवताभ्यो नम: । सर्वोपचारार्थे गन्धाक्षत पुष्पाणि
समर्पयामि ।

घण्टापूजनम् – सुपर्णोऽसि गरुत्मांस्त्रिवृते शिरो
गायत्रञ्चक्षुर्बृहद्रथन्तरे पक्षौ । स्तोमऽआत्मा छन्दा७
स्यङ्गानि यजू७षि नाम । साम ते तनूर्वामदेव्यं
यज्ञायज्ञियं पुच्छन्धिष्ण्या: शफा: । सुपर्णोसि
गरुत्मान्दिवङ्गच्छ स्व: पत ॥

आगमनार्थं तु देवानां गमनार्थं तु राक्षसाम् ।
घण्टानादम् प्रकुर्वीत पश्चाद् घण्टां प्रपूजयेत् ॥

घण्टास्थाय ~~[struck out]~~ गरुडाय नम: । सर्वोपचारार्थे गन्धाक्षत
पुष्पाणि समर्पयामि ।

— चतुःषष्टि योगिनी स्तोत्र मंत्र —

आवाहयाम्यहम देवी योगिनी परमेश्वरीम ।
योगाभ्यासेन संतुष्टा परन्ध्यान समन्विता ॥
दिव्य कुंडल संकाशा दिव्य ज्वाला त्रिलोचना ।
मूर्तिमती ह्यमूर्ता च उग्रा चैवोग्ररूपिनी ॥
अनेकभाव संयुक्ता संसारार्णव तारिणी ।
यज्ञे कुर्वन्तु निर्विघ्नं श्रेया यच्छन्तु मातरः ॥
दिव्य योगी महायोगी सिद्धयोगी गणेश्वरी ।
प्रेताशी डाकिनी काली कालरात्री निशाचरी ॥
हुंकारी सिद्धवेताली खर्परी भूतगामिनी ।
ऊर्ध्वकेशी विरूपाक्षी शुष्कांगी मासभोजिनी ॥
फूत्कारी वीरभद्राक्षी धूम्राक्षी कलहप्रिया ।
रक्ता च घोररक्ताक्षी विरूपाक्षी भयंकरी ॥
चोरिका मारिका चंडी वाराही मुंडधारिणी ।
भैरवी चक्रिणी क्रोधा दुर्मुखी प्रेतवासिनी ॥
कलाक्षी मोहिनी चक्री कंकाली भुवनेश्वरी ।
कुंडला तालकुमारी यमदूती करालिनी ॥
कौशिकी यक्षिणी यक्षी कौमारी यंत्रवाहिनी ।
दुर्घटे विकटे घोरे कम्पाले विषलंघने ॥
चतुःषष्टि समाख्याता योगिन्यो हि वरप्रदा ।
त्रैलोक्यपूजिता: नित्यं देवमानुष योगिभि: ॥

Date

— चतु:षष्टि योगिनी प्रार्थना —

याषां रोष-प्रचण्डपावकसमो वित्तं कुलध्वंसिनः ।
दौर्भाग्यं भवतीति वक्र दृष्ट्या दुःखार्णवाडम्बरः ॥
तुष्यन्त्वति योगिनि विधातृ तनया कालीश्रिया संयुता ।
कल्याणानि प्रदाभवन्तु सर्वा सिद्धिं सुखं क्रध्अताम् ॥

— क्षेत्रपाल प्रार्थना —

जलद पटलनीलं दीप्यमानोग्रकेशं,
त्रिशिख डमरूहस्तं चन्द्रलेखावतंसं !
विमल वृष निरूढं चित्रशार्दूलवासः,
विजयमनिशमीडे विक्रमोद्दण्डचण्डम् ।
सबल बल विघातं क्षेपालैक पालम्,
विकट कटि करालं ह्यट्टहासं विशालम् !
करगतकरबालं नागयज्ञोपवीतं,
भज जन शिवरूपं भैरवं भूतनाथम् ॥
यं यं यक्षरूपं दशदिशिवदनं भूमिकम्पायमानं ।
सं सं सं संहारमूर्तिं शुभ मुकुट जटाशेखरं चन्द्रबिम्बम् ।
दं दं दं दीर्घकायं विकृतनखमुखं चोर्ध्वरोयं करालम् ।
पं पं पं पापनाशं प्रणमत सततं भैरवं क्षेत्रपालं ॥